# 2023

## M.A.

## 4th Semester Examination

## SANSKRIT

## PAPER : SAN-404A & 404B

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

Answer from *any* **one** Group.

## GROUP—A

## ( LITERATURE )

Answer **all** questions.

**( सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः )**

विभाग—क

**1.** यथेच्छं **प्रश्नद्वयं** समाधेयम् : 2×2=4

(क) मृच्छकटिकमिति प्रकरणे नट्या किंनामधेय उपवासो गृहीतः ? तादृशस्योपवासस्य फलं किम् ?

(ख) मृच्छकटिकमिति नाटकस्य नायकः कः ? तस्य संक्षिप्तः परिचयः दीयताम्।

(ग) शूद्रकस्यायुः कियत्कालमासीत् ?

**2.** यथेच्छं **द्वयोः** व्याख्या कार्या : 4×2=8

(क) पातु वो नीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः।
गौरीभुजलता यत्र विद्युल्लेखेव राजते।।

(ख) दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम्।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम्।।

(ग) प्रसरसि भयविक्लवा किमर्थं प्रचलितकुण्डलघृष्टगण्डपार्श्वा।
विटजननखघट्टितेव वीणा जलधरगर्जितभीतसारसीव।।

**3.** यथानिर्देशं समाधेयम् : 8×1=8

(क) मृच्छकटिकमिति नाटकं प्रकरणं वा सयुक्ति प्रतिपाद्यताम्।

( अथवा )

(ख) मृच्छकटिकमित्यस्य समासमालोच्य तस्य एतादृशनामकरणे कारणं प्रदर्श्यताम्।

## विभाग---ख

**4.** यथेच्छं **प्रश्नद्वयं** समाधेयम् : $2 \times 2 = 4$

(क) मुद्राराक्षसमिति नाटकस्य मङ्गलाचरणे कस्य स्तुतिर्विहिता?

(ख) चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः – श्लोकांशेनानेन केषां प्राधान्यं सूचितम्?

(ग) आहितुण्डिकः क आसीत्?

**5.** यथेच्छं **द्वयोः** श्लोकयोः व्याख्या कार्या : $4 \times 2 = 8$

(क) आस्वादितद्विरदशोणितशोणशोभां
सन्ध्यारुणामिव कलां शशलाञ्छनस्य।
जृम्भाविदारितमुखस्य मुखात्स्फुरन्तीं
को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम्।।

(ख) श्यामीकृत्याननेन्दून् रिपुयुवतिदिशां सन्ततैः शोकधूमैः
कामं मन्त्रिद्रुमेभ्यो नयपवनहृतं मोहभस्म प्रकीर्य्य।
दग्ध्वा सम्भ्रान्तपौरद्विजगणरहितान् नन्दवंशप्ररोहान्
दाह्याभावान्न खेदाज्ज्वलन इव वने शाम्यति क्रोधवह्निः।।

(ग) प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति।।

6. यथानिर्देशं समाधेयम् : 8×1=8

(क) मुद्राराक्षसं कीदृशं नाटकम्? तस्योत्सः कः? प्रथमाङ्के राज्ञोऽहितकारिणः के आसन्? तेषां कृते चाणक्येन कीदृशी शास्तिर्विहिता।

( अथवा )

(ख) मुद्राराक्षसे कति अङ्काः सन्ति? तत्र द्वितीयाङ्कस्य नाम किम्? अङ्कस्यास्य एतादृशं नामकरणं यथार्थं न वेति विचार्यताम्।

## GROUP—B

## ( PHILOSOPHY )

Answer **all** questions.

**( सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः )**

### विभाग—क

1. प्रश्नद्वयं समाधेयम् : 2×2=4

(क) 'अथातो ब्रह्मजिज्ञासा' – इति सूत्रस्य प्रणेता कः? ब्रह्मजिज्ञासापदस्य कोऽर्थः?

(ख) सर्वज्ञः कः?

(ग) आस्तिकदर्शनानि कति? नामानि लिख्यन्ताम्।

**2.** कयोश्चिद् **द्वयोः** टीका प्रदेया : 4×2=8

(क) अथातो ब्रह्मजिज्ञासेति सूत्रे अथशब्दस्य कोऽर्थः ?

(ख) शमदमादिसाधनसम्पत्तिः।

(ग) तत्तु समन्वयात्।

**3.** यथाभिमतं **एकः** प्रश्नः समाधेयः : 8×1=8

(क) 'जन्माद्यस्य यतः' – इति सूत्रे 'अस्य' – इत्यनेन किं बोध्यते ? 'यतः' – इत्यस्य कोऽर्थः ?
सर्वं विशद्य सूत्रस्याशयः शङ्कराचार्यदिशा आलोच्यताम्।

(ख) 'शास्त्रयोनित्वादिति' सूत्रतात्पर्यं शाङ्करभाष्यम् आश्रित्य प्रकाशयत।

## विभाग—ख

**4.** यथेच्छं प्रश्नद्वयं समाधेयम् : 2×2=4

(क) 'अर्थसंग्रहः' – इति केन प्रणीतः ? अस्य ग्रन्थस्य एकायाः टीकायाः नाम लिख्यताम्।

(ख) 'चोदनालक्षणोऽर्थो धर्मः' – इति कस्य धर्म–लक्षणम् ? चोदनापदस्य अर्थः कः ?

(ग) उत्पत्तिविधेः लक्षणं किम् ?

5. कयोश्चिद् **द्वयोः** टीका प्रदेया : 4×2=8

(क) शाब्दीभावना

(ख) गुणविशिष्टविधिः

(ग) वेदः

6. यथाभिमतमेकः समाधेयः : 8×1=8

(क) विनियोगविधिस्वरूपमालोच्य श्रुतिलिङ्गवाक्यप्रमाणानां बलाबलविचारः विधीयताम्।

(ख) अधिकारविधिस्वरूपं समासेनालोच्य "ज्योतिष्टोमेन स्वर्गकामो यजेत" – इत्यस्य कथं नोत्पत्तिविधित्वं विचार्यताम्।

★ ★ ★